National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(59): 195-197
© 2025 NJHSR
www.sanskritarticle.com

**डॉ. शकुन्तलादाशः**
अतिथि-अध्यापिका (सहोयकाचार्यश्रेणी),
धर्मशास्त्रविभागः,
केन्द्रीयसंसेकृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी

# मनुस्मृतेः गार्हस्थ्यजीवनदृष्टिः पारिवारिकसङ्कल्पनाश्च

**डॉ. शकुन्तलादाशः**

**शोधसारः**

भारतीयसांस्कृतिकं जीवनम् आश्रमव्यवस्थामधिकृत्य सुनियतमासीत्। ब्रह्मचर्य- गृहस्थ- वानप्रस्थ- संन्यास — एते चत्वारः आश्रमाः मानवजीवनस्य क्रमिकं विकासमार्गं निर्दिशन्ति। तेषु गृहस्थाश्रमः अत्यन्तं प्रधानः परिगण्यते। अन्याश्रमाणां पालकत्वं, धर्मरक्षणं, समाजनियन्त्रणं च गृहस्थेन एव सम्पद्यते। गृहस्थाश्रमे एव धर्मः, अर्थः, कामः च त्रयः पुरुषार्थाः साध्यन्ते। अस्मिन्नाश्रमे एव पुरुषः स्त्री च सम्मिल्य जीवनयात्रां सम्पादयतः। अत एव, गृहस्थाश्रमः केवलं दम्पत्योः सम्बन्धरूपः न भवति, अपि तु समाजस्य स्थैर्यस्य, संस्कृतेः स्थापनस्य च मूलाधाररूपेण अपि गण्यते। भारतीयदृष्ट्या गृहस्थः केवलं स्वपरिवारस्य पालनकर्ता न, अपि तु यज्ञदानादिकर्मभिः समग्रस्य समाजस्य कल्याणे यथाशक्ति योगदानं ददाति। धर्मशास्त्रेषु, स्मृतिग्रन्थेषु, महाभारते, रामायणे च गृहस्थाश्रमस्य माहात्म्यं बहुशः वर्णितम्। तत्र आदर्शगृहस्थानाम् उदाहरणानि — रामः, जनकः, युधिष्ठिरः, अनुसूया, सीता, दमयन्ती च इति अनन्तानि सन्ति। अतः गृहस्थाश्रमः न केवलं पारिवारिकजीवनस्य एकः पक्षः, अपि तु सांस्कृतिकं सामाजिकं च आदर्शं स्थापयति, यत्र प्रेम, कर्तव्यबुद्धिः, परस्परं सम्मानः, सहकार्यभावः च जीवनस्य आधारभूतानि तत्त्वानि सन्ति।

**कूटशब्दाः**

गृहस्थाश्रमः, आश्रमव्यवस्था, पारिवारिकजीवनम्, धर्मपालनम्, कर्तव्यबुद्धिः, संस्कारः, पुरुषार्थत्रयम्, सामाजिककर्तव्यम्, आदर्शगृहस्थः, समर्पणभावः, धार्मिकसंरचना।

**शोधलेखः**

भारतीयशास्त्रपरम्परायां वेदनिःसृतानि यावन्ति शास्त्राणि समुद्भूतानि भवन्ति तेषु वेदार्थानुमापकत्वेन सकलशास्त्रपुरस्कृतं धर्मशास्त्रमेव मूर्द्धन्यस्थानं विभर्त्ति। "श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः"[१] इत्यादिमनुवचनात् ज्ञायते यदस्यैव शास्त्रस्य स्मृतिरित्यपरा संज्ञा। भारतीयपरम्परायामस्य शास्त्रस्य बहुमुख्यं प्राशस्त्यमस्ति। तत्र महाभारते 'धारणाद्धर्म '[२] इति वर्णनया समाजस्य धारणं नाम संरक्षणं सम्बर्धनं च करोति धर्मः। अर्थात् समाजकल्याणकारिणीं कामपि जीवनयापनपद्धतिं निर्दिशति। तैत्तिरीयोपनिषदि 'धर्मञ्चर'[३] इति शिष्यानुशासनात्, मनुस्मृतौ[४] 'भगवान् सर्ववर्णानां यथावदनुपूर्वशः। अन्तरप्रभवानां च धर्मान्नो वक्तुमर्हसि॥' इति, याज्ञवल्क्यस्मृतौ[५] 'योगिश्वरं याज्ञवल्क्यं सम्पूज्य मुनयोऽब्रूवन्। वर्णाश्रमेतराणां नो ब्रूहि धर्मानशेषतः॥' इति, 'चातुर्वर्ण्यसमाचारं किञ्चित्साधारणं वद। चतुर्णामपि वर्णानां कर्तव्यं धर्मकोविदैः॥' इति पराशरस्मृतौ[६] दर्शनात् एभिः वाक्यैः ज्ञायते यत् प्राक्तनभारतीयसमाजस्य चतुर्वर्णीयैः आश्रमस्थैः अनुसरणीयाः आचाराः एव धर्मपदेनोपदिष्टाः भवन्ति।

**Correspondence:**
**डॉ. शकुन्तलादाशः**
अतिथि-अध्यापिका (सहोयकाचार्यश्रेणी),
धर्मशास्त्रविभागः,
केन्द्रीयसंसेकृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी

जिजीविषेदेकैकोऽपि शतं समा इति भारतीयसंस्कृतिरिदं शतवर्षिकं मानवजीवनं चतुर्षु भागेषु विभाजयति। ते इमे भागा: आश्रमपदेनाभिधीयन्ते। ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-सन्न्यास: इति चत्वार: एते आश्रमा:। उक्तं च शतसाहस्र्यां संहितायाम्-

**ब्रह्मचारी गृहस्थस्थश्च वानप्रस्थोऽथ भिक्षुक**

**यथोक्तचारिण: सर्वे गच्छन्ति परमां गतिम्।।**[७]

मनुस्मृतावपि-

**ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा।**[८]

इति स्मर्यते।

सर्वेष्वपि धर्मसूत्रग्रन्थेषु स्मृतिग्रन्थेषु प्रायश: एते आश्रमा: वर्णितास्सन्ति। आ उपसर्गपूर्वकात् श्रम् धातो: घञ् प्रत्यययोगे आश्रमशब्दोऽयं निष्पद्यते। आ शाम्यन्ति अस्मिन् इति आश्रम: इति व्युत्पत्या अस्यार्थ: स्पष्ट:। चतुर्षु एतेष्वाश्रमेषु गृहस्थाश्रम: श्रेष्ठ: इति प्रतिपादितं शास्त्रकारै:। अत एव भारतीयसंस्कृतिप्रवर्तकः मनुमहाराजः जीवनं सुव्यवस्थितरूपेण संचालनाय आश्रमव्यवस्थां निर्मितवान्। चतुर्षु आश्रमेषु गृहस्थमेवान्येषां त्रयाणामाश्रमाणा-माधारभूतः स्तम्भः। मनुस्मृतौ कथितम्-

**सर्वेषामपि चैतेषां वेदस्मृतिविधानतः।**

**गृहस्थ उच्यते श्रेष्ठः सः त्रीनेतान् बिभर्ति हि।।**

**यथा नदीनदाः सर्वे सागरे यान्ति संस्थितम्।**

**तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितम्।।**[९]

गृहस्थाश्रमे दाम्पत्यस्य अतिविशिष्टं महत्वम् वर्तते । दाम्पत्यं विना कीदृशं गृहस्थम्? अतः दाम्पत्यमेव सृष्ट्याधारः।

दाम्पत्य जीवनस्य शुभारम्भः पाणिग्रहणसंस्कारेणैव जायते । यदा दम्पती (पति:पत्नी च) परस्परमन्योऽन्यस्य मनोभावं ज्ञात्वा जीवनरथम् चालयति तदेव सुखिदाम्पत्यम् कथ्यते। मनुस्मृतौ मनुमहाराजेन श्रेष्ठदाम्पत्यस्य जीवनविषये नैकाः शिक्षाः वर्णिताः। यथा पुरुषाय कथितम्-

**मातापितृभ्याम् जामीभिर्भ्रात्रा पुत्रेण भार्यया।**

**दुहित्रा दासवर्णेन विवादं न समाचरेत्।।**[१०]

अनेन श्लोकेन ज्ञायते यत् दम्पत्योर्मध्ये कलहः वर्जितः आसीत्। आचार्यः मनुः स्त्रीपुंसोः न किमपि भेदं स्वीकरोति न च स्त्रीम् दासी पराधीना च मन्यते। सः परस्परमादरभावेन निवसनाय प्रेरयति । यथा कथितं मनुस्मृतौ -

**अन्योऽन्यस्याव्यभिचारो भवेदामरणान्तिकः।**

**एष धर्मः समासेन ज्ञेयः स्त्रीपुरुषयोः परः।।**[११]

**प्रजनार्थं स्त्रियः सृष्टाः सन्तानार्थञ्च मानवाः।**

**तस्मात् साधारणो धर्मः श्रुतौ पत्न्या सहोदितः।।**[१२]

भारतीयपरम्परानुसारं भार्या भर्तुः अर्धांगिनी कथिता। यथा कस्यचिच्छरीस्य कस्याप्यङ्गस्याभावे असहकार्ये वा यथा नैवोन्नति: दृश्यते न वा सुखं प्राप्यते तथैव यस्मिन् कुले दम्पत्योर्भाव: सर्वदा सक एव भवति स नित्यमुन्नतिं प्राप्नोति। एक्तं हि मनुना-

**सन्तुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च।**

**यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम्।।**[१३]

किञ्च चतुर्विधपुरुषार्थसिद्धये च नूनं द्वेऽपि द्वयोरनुगामिनौ भूयास्ताम्। तथाहि-

**यदा भर्ता च भार्या च परस्परवशानुगौ।**

**तदा धर्मार्थकामानां त्रयाणामपि सङ्गतम्।।**[१४]

यत्र तु स्त्रीणां सन्तोषेण कुलमुन्नतिं याति परन्तत्वरोचमानायां नूनं कुलनाशं गच्छति। तथा नार्य: यत्र अनादरेण तिष्ठन्ति तत्कुलं तासां शापवशात् विनश्यत्येव। तच्च मनुना कथितम्-

**स्त्रियां त्वरोचमानायां सर्वं तद्रोचते कुलम्।**

**तस्या त्वरोच्यमानायां सर्वमेव न रोचते।।**[१५]

**जामयो यानि गेहानि शपनन्त्यप्रतिपूजिता:।**

**तानि कृत्याहतानीव विनश्यन्ति समन्तत:।।**[१६]

अत्र जामय: नाम नवोढादुहितृस्नुषाद्या जामय: इत्याहतु: मेधातिथिगोविन्दराजौ इति। अमर-हेमचन्द्र हलायुध-मेदिनीकार-विश्वादय: कोशकारास्तु यामि: (जामि:) स्वसृकुलस्त्रियो: इत्याहु:।[१७]

अत: दाम्पत्यजीवनं सुखीकर्तुं स्त्रीणामादर: सदा कर्तव्य:। स्वोन्नतिकामयमान: पुरुष: सर्वदा स्वभार्यां परितुष्येत इति मनु स्वयं ब्रवीति। तद्यथा-

**तस्मादेता: सदा पूज्या भूषणाच्छादनाशनै:।**

**भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च।।**[१८]

सफलदाम्पत्यजीवनाय वेदेषु वर्णितमस्ति -

**संगच्छध्वं संवदध्वं सं वो मनासिं जानताम्।**

**देवा भागं यथा पूर्वे संजानाना उपासते।।**[१९]

अपि च-

**सह नाववतु सह नौ भुनक्तु सहवीर्यं करवावहै।**

**तेजास्विनावधीतमस्तु मा विद्विषावहै।।**[२०]

अद्यतनीयः दम्पती परस्परं मिलनाय सांसारिकबाधां सोढ्वा प्रयतते। अन्योऽन्यस्य सुखकामनायै अनेकव्रतोपचारान् करोति। एवं बहु कष्टं सोढ्वाऽपि गृहस्थाश्रमे पतिपत्नी उभेऽपि अन्याश्रमिणां कृते साहय्यं प्रदाय जीवनं निर्वहत:। यथा प्राणाख्यवाय्वाश्रयेण सर्वेऽपि जीवा: जीवन्ति तथा गृहस्थाश्रमी सर्वान् पोषयति। अत्रैव पञ्चमहायज्ञा: गृहस्थेन आचर्यन्ते। प्रत्यहं प्रतिदिनं च ज्ञानाज्ञानपूर्वककृतपापकर्मणां कृते पञ्चमहायज्ञा: अनुष्ठीयन्ते। तत्र यज्ञा: यथा-

**अध्यापनं ब्रह्मयज्ञ: पितृयज्ञस्तु तर्पणम्।**

**होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्।।**[२१]

अत: सर्वेष्वाश्रमेषु गृहस्थाश्रमस्य श्रेष्ठत्वं मनुना प्रत्यपादि। गृहस्थ: अन्येषां त्रयाणामाश्रमिणां प्राणतुल्योऽस्ति। अन्नादिदानपुर्वकं प्रतदिनमन्येषामुपकरोति। अत: मनुनोक्तम्-

**यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तव:।**

**तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमा:।।**

**यस्मात्त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहम्।**

**गृहस्थेनैव धार्यन्ते तस्माज्ज्येष्ठाश्रमो गृही।।**[२२]

एवं स्वयं सुखपूर्वकम्वसन्तावन्यान् च सुखं प्रदाय गृहस्थाश्रमे पतिपत्नी च सुखेन जीवनं निर्वहत:। एवं धर्मशास्त्रे सुखस्य स्थापनाय सुखमयजीवननिर्वहणाय च मनुमहाराजेन गृहस्थाश्रमं गृहस्थीं च प्रशंसयामास। तथा समाजे सुखी दाम्पत्यजीवनाय सुपथः प्रदर्शितः।

**ग्रन्थऋणम्-**


१.मनुस्मृतिः, मनुः, हिन्दी टीका, चौखम्वा संस्कृत सीरीज, वनारस-२००६

२. याज्ञवल्क्यस्मृतिः, योज्ञवल्क्यः, मिताक्षराटीका, विज्ञानेश्वरः, चौखम्वा संस्कृत संस्थान, वनारस

३. वाचस्पत्यम्-राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली-१९९०

४. २० स्मृतियां (हिन्दी), संस्कृति संस्थान-हरिद्वार-१९८७

५. धर्मशास्त्रस्येतिहासः, प्रो. जयकृष्णमिश्रः, चौखम्वा संस्कृत सीरीज, वनारस

६. मेघदूतम्, कालिदासः, चौखम्वा संस्कृत सीरीज, वनारस

७. ईशादिदशोपनिषत्, शाङ्करभाष्यम्, गीताप्रेस्, गोरखपुरम्


**पादटिप्पण्य:**

०१.म.स्मृ.२.१०
०२.महा.भा.क.प.४९-५०
०३.तै.उ.१.१२.१
०४.म.स्मृ.१.२
०५. या.स्मृ.१.१
०६.प.स्मृ.१.१७
०७.म.भा.शा.प.२४२-१६
०८.म.स्मृ.६.८७
०९. म.स्मृ.६.८९-९०
१०. म.स्मृ.४.१८०
११. म.स्मृ.९.१०१
१२.म.स्मृ.९.९६
१३.म.स्मृ.३.६०
१४.म.स्मृ.३.६१-१
१५.म.स्मृ.३.६२
१६.म.स्मृ.३.५८
१७.म.स्मृ.पृ.११४ पादटिप्पण्यां
१८.म.स्मृ.३.५९
१९.ऋग्वेदे.
२०.क.उ.शान्तिमन्त्र:
२१.मेघदूते उ.मे.४३
२२.म.स्मृ.३.७०
२३.म.स्मृ.३.७७-७८